श्री परमेश्वर स्तुतिः (देवदारुवनस्थ मुनि कृतं)

श्री परमेश्वर स्तुतिः (देवदारुवनस्थ मुनि कृतं)

ऋषय ऊचुः |
नमो दिग्वाससे नित्यं कृतांताय त्रिशूलिने |
विकटाय करालाय करालवदनाय च || 1 ||

अरूपाय सुरूपाय विश्वरूपाय ते नमः |
कटंकटाय रुद्राय स्वाहाकाराय वै नमः || 2 ||

सर्वप्रणतदेहाय स्वयं च प्रणतात्मने |
नित्यं नीलशिखंडाय श्रीकंठाय नमो नमः || 3 ||

नीलकंठाय देवाय चिताभस्मांगधारिणे |
त्वं ब्रह्मा सर्वदेवानां रुद्राणां नीललोहितः || 4 ||

आत्मा च सर्वभूतानां सांख्यैः पुरुष उच्यते |
पर्वतानां महामेरुर्नक्षत्राणां च चंद्रमाः || 5 ||

ऋषीणां च वसिष्ठस्त्वं देवानां वासवस्तथा |
ओंकारः सर्ववेदानां श्रेष्ठं साम च सामसु || 6 ||

आरण्यानां पशूनां च सिंहस्त्वं परमेश्वरः |
ग्राम्याणामृषभश्चासि भगवान् लोकपूजितः || 7 ||

सर्वथा वर्तमानोऽपि यो यो भावो भविष्यति |
त्वामेव तत्र पश्यामो ब्रह्मणा कथितं यथा || 8 ||

कामः क्रोधश्च लोभश्च विषादो मद एव च |
एतदिच्छामहे बोद्धुं प्रसीद परमेश्वर || 9 ||

महासंहरणे प्राप्ते त्वया देव कृतात्मना |
करं ललाटे संविध्य वह्निरुत्पादितस्त्वया || 10 ||

तेनाग्निना तदा लोका अर्चिर्भिः सर्वतो वृताः |
तस्मादग्निसमा ह्येते बहवो विकृताग्नयः || 11 ||

कामः क्रोधश्च लोभश्च मोहो दंभ उपद्रवः |
यानि चान्यानि भूतानि स्थावराणि चराणि च || 12 ||

दह्यं ते प्राणिनस्ते तु त्वत्समुत्थेन वह्निना |
अस्माकं दह्यमानानां त्राता भव सुरेश्वर || 13 ||

त्वं च लोकहितार्थाय भूतानि परिषिंचसि |
महेश्वर महाभाग प्रभो शुभनिरीक्षक || 14 ||

आज्ञापय वयं नाथ कर्तारो वचनं तव |
भूतकोटिसहस्रेषु रूपकोटिशतेषु च || 15 ||

अंतं गंतुं न शक्ताः स्म देवदेव नमोऽस्तु ते || 16 ||

इति श्रीलिंगमहापुराणे पूर्वभागे द्वात्रिंशोऽध्याये देवदारुवनस्थ मुनिकृत परमेश्वर स्तुतिः |